International Journal of Sanskrit Research 2020; 6(1): 154-159

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 154-159
© 2020 IJSR
www.anantaajournal.com
Received: 18-11-2019
Accepted: 24-12-2019

**डॉ. नृसिंहनाथगुरुः**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्गः, भारत

**Corresponding Author:**
**डॉ. नृसिंहनाथगुरुः**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्गः, भारत

# नैषधे सामाजिकचेतना

**डॉ. नृसिंहनाथगुरुः**

"सहृदयहृदयाह्लादजनकत्त्वं काव्यत्वम्" इति वचनानुसारं कविः सहृदयानां हृदयकन्दरे रसान्वितमानन्दं समुपादयितुं काव्यं रचयति। तस्मिन् सुख-दुःख-मोह-मायादिकस्य मानवजीवनस्य वास्तवचित्रं प्रतिपादयति। येन सहृदयाः सामाजिकगुणवैभवेन विभूषिताः सन्तः परमानन्दं प्राप्नुवन्ति। महाकविः श्रीहर्षः द्वाविंशतिसर्गात्मके नैषधीयचरिते महाकाव्ये सामाजिकानां जनानां कृते पदलालित्ययुक्तम् उपदेशप्रदायकं प्रचुरतरं सामाजिकचिन्तनं प्रतिसर्गं वर्णयति।

- **विद्याभूषणम्**

आधुनिके सामाजिकजीवने विद्यायाः आवश्यकता नितरामपेक्षते। विद्या नाम कस्यचिदपि विषयस्य सम्यक् ज्ञानम्। या देववत् पन्थानं प्रथयति, स्मृतिं सारयति, मेधां समेधयति, प्रज्ञां प्रज्वालयति, बुद्धिं प्रबोधयति। अतः नित्यं विद्याधनं सर्वधनप्रधानं भवति।[1] विद्याविहीनः जनः पशुसमानः भवति।[2] तस्मात् साधुकथितमस्ति "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।"[3] अमुं विषयमनुभवन् श्रीहर्षः सामाजिकानां कृते उपदिशति यत् राजा नलः राजाभूत्वाऽपि चतुर्दशविद्यासु पारङ्गमः आसीत्। तद्यथा –

"अधीतिवोधाचरणप्रचारणैर्दशाश्चतस्त्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान्कृतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्॥"[4]

चतुर्दशविद्या यथा –

"अङ्गानि वेदश्चत्वारो मीमांसान्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्दश॥"[5]

सामाजिकजीवने बुद्धिलब्ध्यनुसारमेकः जनः एकस्मिन् शास्त्रे प्रवीणः भवति। अपरः कोऽपि विचक्षणमतिवान् शास्त्रान्तरेषु प्रतिभावान् भवति। परन्तु निरन्तराभ्यासवसात् एताः विद्याः रसनाग्रनर्तकीव राज्ञः नलस्य शोभावर्द्धकाः अभवन्। तद्यथा –

"अमुष्यविद्यारसनाऽग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां जिगीषया
नवद्वयद्वीपपृथग्जयश्रियाम्॥"[6]

तृतीयसर्गे नलस्य मुखमण्डले चतुर्दशविद्याः अष्टादशविद्याश्च दन्तपंक्तिरूपेण शोभन्ते इति कविः प्रतिपादयति। तद्यथा –

"रेखाभिरास्ये गणनादिवाऽस्य द्वात्रिंशता दन्तमयीभिरन्तः।
चतुर्द्दशाऽष्टादश चाऽत्र विद्या द्वेधाऽपि सन्तीति शशंस वेधाः॥"[7]

अतः राजा नलः महादेव इव शास्त्ररूपं तृतीयं नेत्रं धृतवान्।

- **रूपसौन्दर्यम्**

सुष्ठु उनत्ति आद्रीकरोति चित्तम् (सु + उन्द् + क्लेदने + अरः) इति सुन्दरः। अमरकोशानुसारं "सुन्दरं रुचिरं चारू सुषमं साधु शोभनम्.... " इत्यादिरूपेण पर्य्यायशब्दाः समुपलभ्यन्ते। सुन्दं रातीति सुन्दरं तस्य भावः सौन्दर्यम्। कवयः काव्येषु रूपसौन्दर्यं, प्रकृतिसौन्दर्यं, प्रकरणसौन्दर्यादिरूपेण सौन्दर्यतत्त्वं स्वीकुर्वन्ति। महाकविः श्रीहर्षः रूपसौन्दर्यभूतं सामाजिकचिन्तनं सम्यक् अत्र प्रतिपादितवान्। राज्ञः नलस्य रूपयौवनवर्णने यथा–

"सरोरुहं तस्य दृशैव निर्जितं जिताः स्थितेनैव विधोरपि श्रियः।
कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता॥"[8]

नलस्य नेत्रद्वयं पद्मं तिरोस्करोति स्म। तस्य मन्दहास्यं चन्द्रस्य शोभां भर्त्सयति स्म। आभ्यां पद्मचन्द्राभ्याम् अधिकसुन्दरं वस्तुजगति नास्ति। किञ्च नलः एतादृशः रूपयौवनवान् आसीत् यत् त्रिभुवनस्य रमण्यः तदासक्तचित्ताः जाताः। स्वर्गवासिन्यः रमण्यः प्रणयातिशयात् स्मरसुन्दरं नलं निर्मिमेषनयनैः विलोक्य यत् अभ्यासातिशयम् अर्जितवत्यः तदद्यापि प्रकटयन्ति। तद्यथा –

"निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः।
अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वैरधुनापि लोचनैः॥"[9]

पातालवासिन्यः सर्परमण्यः अस्माकं नयनयुगलं राज्ञः नलस्य सौन्दर्यादि गुणगणान् श्रुतमस्मात् जीवनं धन्यं जातं, परन्तु चर्म चक्षुभ्यां नलस्य सौन्दर्यं न दृष्टमतः जीवनं निष्फलं जातम्। एवं प्रकारेण ताः स्वनयनयुगलं प्रशंसन्ति स्म, निन्दयन्ति स्म। तद्यथा –

"अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्।
इति स्म चक्षुः श्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः॥"[10]

मर्त्यवासिन्यः रमण्यः स्वहृदये निरन्तरं नलम् अस्मरन्। सुतरां ताः नेत्रमुद्रणकालेऽपि नलस्य शोभां द्रष्टुम् अशक्नुवन्। तद्यथा –

"विलोकयन्तीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि।
अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः॥"[11]

महाकविः श्रीहर्षः दमयन्तीं त्रिभुवनसुन्दरीति वर्णयति। तद्यथा–

"भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम्।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ॥"[12]

हंसमुखेन दमयन्त्याः नखशिखवर्णने निपुणोऽयं महाकविः नारीसौन्दर्यस्य सर्वातिशायिमहत्त्वं सूचयति –

"नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम्॥"[13]

किञ्च दशमसर्गे इन्द्रस्य मुखेन दमयन्त्याः रूपसौन्दर्यमेवं वर्णयति –

"स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा।

हेमेव कायप्रभयाङ्गशेषैस्तन्वी मतिं क्रामति मेनकाऽपि॥"[14]

रूपयौवनवर्णने निपुणः श्रीहर्षः सामान्यं हंसं सुवर्णमयहंसः इति प्रतिपादयति। तद्यथा –

"हिरण्मयहंसमबोधि नैषधः।"[15]

तत्रैव दशमसर्गे स्वयम्वरसभामागत्य दमयन्तीं दृष्ट्वा सर्वे देवगणाः तदीयसौन्दर्येण आनन्दिताः सञ्जाताः। जनमुखात् यत् सौन्दर्यं तैः पूर्वं श्रुतं तत्तु प्रकृतिसौन्दर्याद् बहुन्यूनमिति एवं भावयन्ति –

"रूपं यदाकर्ण्य जनाननेभ्यस्ततद्दिगन्ताद् वयमागमाम।
सौन्दर्यसारादनुभूयमानादस्यास्तदस्मात् बहुना कनीयः॥"[16]

- **गुणवैभवम्**

समाजे गुणगौरवसम्पन्नः, सद्भावभूषाभूषितः, ज्ञानालङ्कृतः, शीलसमन्वितश्च जनः सर्वेषां वन्द्यो मान्यः पूज्यश्च भवति। कालिदासेन रघुवंशे उक्तम् –

"तेजस्विनां वयो न गण्यते।
तेजसां हि न वयः समीक्ष्यते॥"[17]

भवभूतिनाऽपि उक्तम् –

"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥"[18]

समाजे न केवलं साधारणजनाः अपि तु राजानः गुणवैभवसम्पन्नाः भवन्ति चेत् सर्वत्र आद्रियन्ते सम्मान्यन्ते च। नैषधीयचरिते प्रथमसर्गे विदर्भराजकन्या दमयन्ती निषेधदेशात् ये दूतब्राह्मणनटादयः कार्यविशेषसम्पादनार्थं विदर्भदेशं प्रति आगच्छन्ति स्म; तान् व्याजेन पृच्छति स्म - "श्रूयते भवतां देशे यो नृपो विद्यते सः सकलसद्गुणभूषितः " इति सत्यं न वा? तदा ते राज्ञः नलस्य दया-दाक्षिण्य-परोपकार-सदाचार-न्याय-सत्यसम्भाषणादीन् गुणान् तस्याः पुरतः प्रकटयन्ति। तान् श्रुत्वा कुशकलेवरा दमयन्ती ईदृशः सर्वगुणसम्पन्नः नायकः मादृशां दुर्लभः इति भावयति सति बहुकालं यावत् आनन्दिता भवति। तद्यथा –

"नलस्य पृष्टा निषधागता गुणान् मिषेण दूतद्विजवन्दिचारणाः।
निपीय तत्कीर्तिकथामथानया चिराय तस्थे विमनायमानया॥"[19]

किञ्च सप्तदशसर्गे देवराजः इन्द्रः नलस्य गुणगानं स्वयमेव करोति –

"भव्यो न व्यवसायन्ते नले साधुमतौ कले !
लोकपालविशालोऽसौ निषधानां सुधाकरः॥"

अपि च –

"न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाभृति।
निचिताखिलधर्मे च द्वापरस्योदयं वयम्॥"[20]

- **कामविकारः**

सृष्टिकर्तुः ब्रह्मणः सृष्टौ सर्वे प्राणिनः कामग्रस्ताः भवन्ति। भिन्न भिन्न प्रकारेण स्व स्व कामभावनां प्रशमयन्ति च । मनुष्याणां का कथा। नैषधीयचरिते महाकविः श्रीहर्षः विषयममुं चिन्तयन् प्रतिपादयति –

राज्ञः नलस्य रूपयौवनेन मुग्धाः सत्यः रमण्यः कामविकारग्रस्ताः सञ्जाताः। तत्र निरन्तररूपेण नलविषयकचिन्तनवसात् का रमणी रात्रौ स्वप्ने नलं न दृष्टवती अपि तु सर्वाः एव दृष्टवत्यः। का रमणी स्व पत्युः नामोचारणसमये अनुरागवसात् नलस्य नामोच्चारणं न कृतवती अपि तु सर्वाः कृतवत्यः। किमधिकं का रमणी पतिदेवेन सह मिलनसमये निजं पतिदेवं नल इति विचिन्त्य स्वकामोद्रेकं न कृतवती। अपि तु सर्वाः एव कृतवत्यः।

"न का निशि स्वप्नगतं ददर्श तं जगाद गौत्रस्खलिते च का न तम्।
तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम्॥"[21]

भीमनन्दिनी दमयन्ती मनसा राजानं नलं पतिरूपेण वरणं कृतवती। सुतरां निद्राकाले सा कस्यां रात्रौ राजानं नलं स्वप्ने

न दृष्टवती। अपि तु सर्वस्यां रात्रौ निद्रायां नलं पश्यति स्म। तद्यथा –

> "मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति।
> अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिम्॥"[22]

तथाहि कामविकारसंसक्तायाः दमयन्त्याः कृते दिनानि रात्रिसमयानि च विपरीतानि जातानि। यद्यपि हेमन्तकाले दिनानि ह्रस्वानि, ग्रीष्मकाले रात्रयोरपि ह्रस्वाः परन्तु तस्याः नलासक्तायाः कृते हेमन्तकाले दिनानि दीर्घाणि जातानि, ग्रीष्मकाले रात्रयोरपि दीर्घाः जाताः। तद्यथा –

> "अहो अहोभिर्महिमा हिमागमेऽप्यतिप्रपेदे प्रतितां स्मरार्दिताम्।
> तपर्तुपूर्त्तावपि मेदसां भरा विभावरीभिर्विभराम्बभूविरे॥"[23]

विधातुः अव्यर्थेच्छतया तदेव विलसितम्। अङ्गरहितस्याऽपि कामस्य पुष्पमयत्वात् अतीवकोमलाः बाणाः नलस्य दुर्भेद्यं धौर्यकवचं भेतुं समर्थाः जाताः। तैः वाणैः संसक्तः राजा नलः दमयन्तीं प्रति आकृष्टः भूत्वाऽपि राज्ञः भीमस्य समीपे कन्यां दमयन्तीं विवाहाय न प्रार्थितवान्। यतः अभिमानिनः जितेन्द्रियाः वरं स्वप्राणान् स्वसुखं परित्यजन्ति। परन्तु एकम् अयाचितं व्रतं न परित्यजन्ति। तद्यथा –

> "स्मरोपतप्तोऽपि भृशं न स प्रभुः विदर्भराजं तनयामयाचत।
> त्यजन्त्यसून् शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम्॥"[24]

- **राज्ञः कर्त्तव्यम्**

"स्यात् राजा भृत्यवर्गेषु प्रजासु च यथा पिता।"

राज्ञः प्रधानकर्त्तव्यमस्ति धर्ममार्गेण प्रजापालनम्। तद्यथा –

> "क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्।
> निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते॥[25]"

महाकविकालिदासेन रघुवंशे उक्तम् –

> "नृपस्य वर्णाश्रमपालनं यत्स एव धर्म मनुना प्रणीता।
> निर्वासिताप्येवमतस्त्वयाऽहं
> तपस्विसामान्यमवेक्षणीया॥"[26]

तथैव राजा नलः पौरजनानां मङ्गलाय ज्ञान-यज्ञ-तप-दान प्रभृतिभिः चतुर्भिश्चरणैः धर्मं स्थिरी कृतवान्। किं बहुना अधर्मोऽपि धर्माचरणपूर्वकं तपः आचरितवान्। तद्यथा –

> "पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुनां के न तपः प्रपेदिरे।
> भुवं यदेकांध्रिकनिष्ठया स्पृशन् दधावधर्मोऽपि कृशस्तपस्विताम्॥"[27]

प्रजारक्षणमित्यस्य साधारणतः अर्थः भवति, न केवलं प्रजानां साधारणजनानां जीवनरक्षणमपितु तेषां धनसम्पत्तीनां, मौलिकाधिकाराणां, सामाजिकसुरक्षाणाञ्च संरक्षणम्। तथैव राजा नलः एतादृशः नृपः आसीत् यः अयं द्ररिद्रः भविता इति विधिलिपिं मिथ्या कृतवान्। यतोहि महावदान्यः राजा नलः धनदानेन कल्पवृक्षमपि अल्पीकृतः आसीत्। यतः कल्पवृक्षः वाञ्छितं खलु फलं ददाति। परन्तु राजा नलः अवाञ्छितमपि विविधवस्तुदानेन प्रार्थिजनस्य दारिद्र्यस्य दरिद्रतां विदधति स्म। तद्यथा –

> "अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
> मृषा न चक्रेऽल्पितकल्पपादयः प्रणीय दारिद्र्यदरिद्रतां नृपः॥"[28]

- **जीवनरक्षणम्**

मोहमायाऽस्मिन् संसारे सर्वे जनाः स्वजीवनरक्षार्थं यतन्ते। स्वकीयस्य पुरतः आसन्नं मरणं दृष्ट्वा ममाऽनन्तरं मम परिवारस्य का दशा भविता इति विचिन्त्य खिन्नाः सन्तः म्रियमाणाः भवन्ति। अतः महाकविः श्रीहर्षः विषयममुमनुभवन् सुवर्णमयहंसमुखेन सामाजिकचेतनां जागर्ति। तत्र उपवनदर्शनसमये सुवर्णमयं हंसं दृष्ट्वा राजा नलः आश्चर्येण कौतुहलेन च यदा तं धृतवान् तदा सः हंसः बहुवारं प्रयत्नं कृतवान्, यदा राजा नलः न त्यक्तवान् तदा हंसः एवं निवेदितवान् – हे राजन्! अनपराधिनः मम वधः केवलं जन्तुवधमात्रं न भवति अपि तु भवतः स्वरूपदर्शनात् भवान्

महान् धार्मिकः राजा इति त्वयि मे विश्वासः सञ्जातः। सुतरां मम वधः विश्वासस्य वधः भवति। तद्यथा –

"न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।
विगर्हितं धर्मधनैर्निर्वहणं विशिष्य विश्वासजुषां द्विषामपि॥"[29]

अनन्तरं यदा राजा नलः तं सुवर्णमयं हंसं न त्यक्तवान् तदा हंसः आकुलनिवेदनं करोति – हे राजन् ! अहं मम जनन्याः एक एव पुत्रः। सा मम जननी जरातुरा वार्द्धक्यपीडिता सती आहारसंग्रहाक्षमा । मम पत्नी हंसी अचिरप्रसवा, विशेषतः पतिव्रता चाऽस्ति। सुतरां साऽपि आत्मजीविकानिर्वहणे न समर्था। मत्स्वरूपोजनः तयोः जननी जाययोः एकमात्रजीविकानिर्वाहोपायः। हे विधात ! एवं विधं मां विनाशयतः देवस्य तव हृदये करुणा न प्रतिवध्नाति? तद्यथा –

"मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्द्दयन् अहो विधे ! त्वां करुणा रुणद्धि न॥"[30]

- **प्रकृतिचिन्तनम्**

युगे युगे समाजे प्रकृत्या सह प्राणीनां महान् सम्बन्धः दृश्यते। प्रकृतिं परित्यज्य मानवसमाजस्य कल्पनां कर्तुं न शक्यते। नैषधे प्रकृतिचिन्तनं चारुतरं वर्णितम्। प्रथमसर्गे नलः उपवनं प्रविश्य वनपालप्राणिना निवेद्यमानं काननरामणीयकञ्च व्यलोकयत्। तत्रत्याः वृक्षाः वृद्धमहर्षय इव राज्ञः आतिथ्यं शिक्षितवन्तः। तद्यथा –

"फलानि पुष्णानि च पल्लवे करे वयोऽतिपातोद्गतवातवेपिते।
स्थितैः समादाय महर्षिवार्धकाद् वने तदातिथ्यमशिक्षि शाखिभिः॥"[31]

ईषत् कम्पितां दमयन्त्याः सादृश्यं वहन्तीं कामपि नवां लतां नलः भयेन सातिशयमुखेन दृष्टवान्। यथा –

"नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे॥"[32]

तदित्थं महाकविः श्रीहर्षः सामाजिकानां जनानां आन्तरिकभावनां विचिन्त्य नैषधीयचरितमहाकाव्ये पदे पदे सामाजिकचेतनामाविष्करोत्यलं पल्लवितेन।

**सन्दर्भसूची**


1. सुभाषितरत्नभाण्डागारः – पृ. ३०
2. भर्तृहरि- नीतिशतकम् - २०
3. श्रीमद्भगवद्गीता – ४।३८
4. नैषधीयचरितमहाकाव्यम् – प्रथमसर्गः - ४
5. विष्णुपुराणम्
6. नैषधीयचरितमहाकाव्यम् – प्रथमसर्गः - ५
7. तत्रैव, तृतीयसर्गः - ३५
8. तत्रैव, प्रथमसर्गः - २४
9. तत्रैव, प्रथमसर्गः - २७
10. तत्रैव, प्रथमसर्गः - २८
11. तत्रैव, प्रथमसर्गः - २९
12. तत्रैव, द्वितीयसर्गः - १८
13. तत्रैव, द्वितीयसर्गः - २३
14. तत्रैव, दशमसर्गः - १३४
15. तत्रैव, प्रथमसर्गः - ११७
16. तत्रैव, दशमसर्गः - ११४
17. रघुवंशमहाकाव्यम् – एकादशसर्गः - १
18. उत्तररामचिरतम् – चतुर्थोऽङ्कः - ११
19. नैषधीयचरितमहाकाव्यम् – प्रथमसर्गः - ३७
20. तत्रैव, सप्तदशसर्गः – १४२, १४३
21. तत्रैव, प्रथमसर्गः - ३०
22. तत्रैव, प्रथमसर्गः - ३९
23. तत्रैव, प्रथमसर्गः - ४१
24. तत्रैव, प्रथमसर्गः - ५०
25. मनुस्मृतिः – ७।१४४
26. रघुवंशम् – चतुर्दशसर्गः - ६७
27. नैषधीयचरितमहाकाव्यम् – प्रथमसर्गः - ६
28. तत्रैव, प्रथमसर्गः - १५
29. तत्रैव, प्रथमसर्गः - १३१
30. तत्रैव, प्रथमसर्गः - १३५
31. तत्रैव, प्रथमसर्गः ७७
32. तत्रैव, प्रथमसर्गः ८५

33. नैषधीयचरितम् – मल्लिनाथ टीका – व्याख्याकारः – नारायण राम आचार्य, चौखम्बा विद्याभवन, वाराणसी।
34. नैषधीयचरितम् – जीवातु, चन्द्रिका संस्कृतहिन्दीव्याख्योपेतम्, व्याख्याकारः – डॉ. देवर्षि सनाढ्य शास्त्री, चौखम्बा कृष्णदास अकादमी, वाराणसी।
35. संस्कृतसाहित्येतिहासः – आचार्य लोकमणिदाहालः, चौखम्बा कृष्णदास अकादमी, वाराणसी।
36. संस्कृत साहित्य का अभिनव इतिहास – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन वाराणसी।
37. कालिदासग्रन्थावली – ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
38. उत्तररामचरितम् – 'इन्दुमती' – संस्कृत-हिन्दीव्याख्यासहितम्, संस्कृत-टीकाकारः – आचार्यत्रिनाथशर्मा, हिन्दी व्याख्याता सम्पादकश्च डॉ.कपिलदेव गिरिः, चौखम्बा संस्कृत संस्थान।
39. मनुस्मृतिः – व्याख्याता – ब्रजकिशोरस्वाँइ, सद्ग्रन्थनिकेतनम्, पुरी, ओडिशा ।
40. संस्कृतनिबन्धशतकम् – डॉ.कपिलदेव द्विवेदी, विश्वविद्यालयप्रकाशन, वाराणसी।
41. मम संस्कृतशोधपत्रमाता – डॉ. सत्यनारायण आचार्यः, प्रकाशिका – श्रीमती सौदामिनी त्रिपाठी, पुरी, ओडिशा।
42. नैषधीयचरितम् – मल्लिनाथ टीका – व्याख्याकारः – नारायण राम आचार्य, चौखम्बा विद्याभवन, वाराणसी।
43. नैषधीयचरितम् – जीवातु, चन्द्रिका संस्कृतहिन्दीव्याख्योपेतम्, व्याख्याकारः – डॉ. देवर्षि सनाढ्य शास्त्री, चौखम्बा कृष्णदास अकादमी, वाराणसी।
44. संस्कृतसाहित्येतिहासः – आचार्य लोकमणिदाहालः, चौखम्बा कृष्णदास अकादमी, वाराणसी।
45. संस्कृत साहित्य का अभिनव इतिहास – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन वाराणसी।
46. कालिदासग्रन्थावली – ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
47. उत्तररामचरितम् – 'इन्दुमती' – संस्कृत-हिन्दीव्याख्यासहितम्, संस्कृत-टीकाकारः – आचार्यत्रिनाथशर्मा, हिन्दी व्याख्याता सम्पादकश्च डॉ.कपिलदेव गिरिः, चौखम्बा संस्कृत संस्थान।
48. मनुस्मृतिः – व्याख्याता – ब्रजकिशोरस्वाँइ, सद्ग्रन्थनिकेतनम्, पुरी, ओडिशा ।
49. संस्कृतनिबन्धशतकम् – डॉ.कपिलदेव द्विवेदी, विश्वविद्यालयप्रकाशन, वाराणसी।
50. मम संस्कृतशोधपत्रमाता – डॉ. सत्यनारायण आचार्यः, प्रकाशिका – श्रीमती सौदामिनी त्रिपाठी, पुरी, ओडिशा।